# विभाजनम् : एका विभीषिका

(प्रचलतः एकस्य कार्यक्रमस्य दृश्यम्)

*गीतम्*

एत बालका दर्शयामि वः दृश्यं हिन्दुस्तानस्य

कुरुत अस्या मृत्तिकातिलकं, धरणिरियं बलिदानस्य।

वन्दे मातरम्, वन्दे मातरम् .....

एत बालका दर्शयामि वः दृश्यं हिन्दुस्तानस्य

कुरुत अस्या मृत्तिकातिलकं, धरणिरियं बलिदानस्य।

वन्दे मातरम्, वन्दे मातरम् .....

बालः - पितामह ! पितामह! किमु भवता श्रुतं जना एते कियत् सुन्दरं गायन्तीति ?

पितामहः - वन्दे मातरम्... वन्दे मातरम्... वाक्यमिदमीदृशं, यद् गातुं श्रोतुं च नितान्तमिच्छामि।

बालः- पितामह! केयं विभाजनस्य विभीषिका ?

पितामहः - विभाजनस्यार्थं नावगच्छसि! यदि विभाजनं न जानासि तर्हि तद्विभीषिकां कथं ज्ञास्यसि?

अये बालकाः! अस्माकं देशः पूर्वमतिविशाल आसीत्। परन्तु पश्चादस्य विभाजनमभवत्।

बालः – अर्थात् विभाजितः ?

पितामहः - ओम्, विभाजितः। परन्तु वण्टन-विभाजनयोरस्ति भेदः। चिन्तय, तव निकटे दश मोदकानि सन्ति । तानि द्वाभ्यां वण्ट्यन्ते चेत् प्रत्येकं पञ्च भविष्यन्ति। अधुना पश्य, तव निकटे एकमेव मोदकमस्ति चेत्, किं करिष्यसि ?

बालः - अहं तद् द्विधा भङ्क्त्वा वण्टयिष्यामि।

पितामहः- बालकाः, एकस्य त्रोटनं, खण्डीकरणं वा विभाजनमेव । तस्माद् या पीडा उत्पद्यते, सैव विभीषिका नाम।

बालः- पितामह! विभाजनं तु अवगतम्। परन्तु विभीषिका .... विभाजनम्..... विभीषिका...

पितामहः- अस्तु, बोधयामि।

(गीतम्)

एत बालका दर्शयामि वः दृश्यं हिन्दुस्तानस्य

कुरुत अस्या मृत्तिकातिलकं, धरणिरियं बलिदानस्य।

वन्दे मातरम्, वन्दे मातरम् .....

एत बालका दर्शयामि वः दृश्यं हिन्दुस्तानस्य

कुरुत अस्या मृत्तिकातिलकं, धरणिरियं बलिदानस्य।

वन्दे मातरम्, वन्दे मातरम् .....

बालः- पितामह, मां सम्यग् बोधयतु विभाजनमिदं कथं जातमिति।

पितामहः – वदामि, वदामि। स्वदेशविभाजनविषये वदामि। ध्यानेन शृणु। विभाजनमाधृत्येतिहासकाराणां या दृष्टिः, तां ध्यानेन शृणु । बोद्धुमपि प्रयतेय ।

(गीतम्)

यत्र प्रीतिरेव हि रीतिः

यत्र प्रीतिरेव हि रीतिः

अहं गीतं तदीयं गायामि

भारतीयोऽहं तावदस्मि

भारतगाथां श्रावयामि

यत्र प्रीतिरेव हि रीतिः....

सूत्रधारः प्रथमः- अखण्डभारतस्य विभाजनमभूतपूर्वमानवविस्थापनस्य अगत्या पलायनस्य एका पीडादायिनी गाथा।

सूत्रधारः द्वितीयः - इयमेवं गाथा, यत्र अगणिता मानवा अज्ञातानां मध्येऽत्यन्तविपरीतपरिस्थितावपि नवाश्रयमन्विष्यन्ति स्म।

सूत्रधारः प्रथमः- विश्वासाधारेण धार्मिकाधारेण च एकस्य हिंस्रविभाजनस्य गाथामतिरिच्य इयमन्यस्य प्रसङ्गस्यापि कथाऽस्ति यत् - - -

सूत्रधारः द्वितीयः - केन प्रकारेण एकस्या जीवनशैल्या, अतिप्राचीनसहास्तित्वस्य च युगं नितान्तनाटकीयरूपेण समाप्तिं गतमिति।

सूत्रधारः प्रथमः - यस्मात् क्षेत्रात् षष्टिलक्षपरिमिता हिन्दवः, सिखाः, अन्यसम्प्रदायानां च जनाः प्राणभयेन प्रपलाय्यागताः, तत् परस्तात् पश्चिमपाकिस्तान इति ख्यातम्।

सूत्रधारः द्वितीयः- पञ्चषष्टिलक्षपरिमिता जनाः पञ्जाबप्रान्तात्, दिल्लीतः, भारतस्यान्यप्रान्तेभ्यः पश्चिमपाकिस्तानं प्राप्ताः।

सूत्रधारः प्रथमः – विंशलक्षपरिमिता हिन्दवः, इतरसम्प्रदायानां जनाः पूर्वबङ्गप्रदेशं विहाय पश्चिमबङ्गप्रदेशमायाताः, यः पूर्वबङ्गप्रदेशः परस्तात् पूर्वपाकिस्तान इति ख्यातः।

सूत्रधारः द्वितीयः - ई.वी. 1950 वर्षे विंशलक्षपरिमिता हिन्दवः, अन्य सम्प्रदायानां च जनाः पश्चिमबङ्गप्रदेशं प्राप्ताः।

सूत्रधारः प्रथमः- दशलक्षमुसलिमजनाः पश्चिमबङ्गप्रदेशं सन्त्यज्य पूर्वपाकिस्तानं गताः ।

सूत्रधारः द्वितीयः - अस्या विभीषिकायां मृतानां पञ्चलक्षसङ्ख्या उच्यते।

सूत्रधारः प्रथमः- परन्तु अनुमानेन इयं सङ्ख्या दशलक्षं यावत् ।

(गीतम्)

वहन्ति नयनेभ्यः पीडाया धाराः

वहन्ति नयनेभ्यः पीडाया धाराः

विकलं जीवनं निर्गता बन्धुता

विकलं जीवनं निर्गता बन्धुता ॥

बालः – पितामह! एतेषां जनानां गृहादिकं सर्वं छिन्नम्। अहं तु श्रुत्वा बिभेमि।

पितामहः - बालाः, अयं तु भयस्य विषय एव । चिन्त्यतां, तदानीं जनानां काऽवस्था जनिता स्यात्।

बालः - पितामह! तदानीं तु मादृशा बालका अपि स्युः। तेषां दशा कीदृशी स्यात् ?

पितामहः- आम्, त्वादृशाः बहवः शिशव आसन्, यैः तद् दृश्यमक्षिभ्यां प्रत्यक्षीकृतम्। अद्यापि तत् स्मृत्वा रोमाञ्चिता भवन्ति।

बालः- अग्रेऽग्रे श्रावयतु पितामह !

पितामहः - श्रावयामि । शृणुत

(गीतम्)

इमं पश्यत बङ्गप्रदेशं सर्वत्र हरिद्वर्णं

अत्रापि प्रत्येकं बालो देशाय वृणुते मरणम् ।

एत बालका दर्शयामि वः दृश्यं हिन्दुस्तानस्य

कुरुत अस्या मृत्तिकातिलकं, धरणिरियं बलिदानस्य।

वन्दे मातरम्, वन्दे मातरम् .....

शिक्षकः - उपविशत ।

बालाः - सुप्रभातम् गुरो!

बालाः- गुरो! श्रूयतां तावत्। भवान् विभाजनविषये किमपि वदन्नासीत्। भवता उक्तमासीद् यत् बहु किमपि अस्माभिः परिभ्रष्टम् इति। इदानीमग्रे वदतु यद् विभाजने पुनः किं संवृतमिति।

शिक्षकः - ई.वी. 1947 वर्षे फरवरीमासस्य विंशदिनाङ्के ब्रिटिशप्रधानमन्त्रिणा क्लेमेण्ट एटलीवर्येण 'हाउस आफ कामंस' मध्ये इदमुद्घोषितम्......

बालः- गुरो ! इतोऽप्यग्रे अहं वदामि। अहं जानामि....

शिक्षकः- अस्तु, वद ।

बालः१ - मित्राणि! सर्वकारेण ई.वी. 1948 वर्षे जूनमासत्रिंशदिनाङ्कात् पूर्वम्....

शिक्षकः - अरे पूनम ! तत्र कुतः ? अत्रागत्य सर्वान् बोधय ।

बालः२ - अस्तु गुरो! तस्मिन् दिने सर्वकारेण अधिकारं हस्तान्तरीकृत्य भारतं त्यक्तुं निर्णयः कृतः।

बालः३- गुरो! अहम्.....

शिक्षकः - अस्तु, त्वमपि वद।

बालः४- सम्पूर्णा प्रक्रिया लार्डमाउंटबेटेनकारणात् वर्षात् पूर्वं निर्णीताऽऽसीत्।

बालः ५ - आम् गुरो ! लार्डमाउंटबेटेन: ई.वी. 1947 वर्षे मई 31 दिनाङ्के लन्दनादधिकारहस्तान्तरणस्वीकृतिमादाय दिल्लीमागतः।

बालः ६ - अहं स्मरामि यत् ई.वी. 1947 वर्षे जूनमासस्य द्वितीये दिनाङ्के ऐतिहासिके उपवेशने विभाजनस्य योजनोपरि सामान्यत सहमतिः अभूत्।

बालः ७ - आम् गुरो ! भारतविभाजनस्य निर्णयः प्रतिज्ञातपूर्व इवासीत्। भारतदेशस्य विभाजनं धर्माधारेण भवेदिति योजनायाः प्रबलो विरोधोऽभवत्।

बालः १ - एवमपि कथ्यते यत् अस्य विभाजनस्य कृते नेतारो मानसिकरूपेण प्रस्तुता आसन्, यैः भविष्यं हितं च विभाजनेन उज्ज्वलतरं दृष्टम्।

शिक्षकः - बालाः, युस्मभ्यं धन्यवादाः। यूयं बहु जानीथ । कक्षाग्रहणात् पूर्वं किञ्चिद् विश्रमामः।

सर्वे बालाः – आम् गुरो !

<u>गीतम्</u>

वन्दे मातर**म्,** वन्दे मात**रम्**

वन्दे मातर**म्,** वन्दे मात**रम्**

वन्दे मातरम्, वन्दे मातरम्

वन्दे मातरम्, वन्दे मातरम्

सूत्रधारः १ - भ्रातः ! विभाजनमाधृत्य तव को विचारः?

सूत्रधारः २ - भ्रातः ! विभाजनेन समाजे प्रगतिः स्यात् । नानासम्प्रायाः स्वस्वाधिकारान् लप्स्यन्ते ।

सूत्रधारः १ – न न । विभाजनेन एवं न किमपि भवेत् । अरे, एकतायां समाजे विकासः सम्भवेत् । अस्माभिरेकीभूतैः सर्वैः समाजः समृद्धिपथे सारणीयः ।

सूत्रधारः ३- तव कथनमुचितम् । परन्तु इयं वास्तविकता यत् विभाजनेन सर्वं सम्भवति ।

सूत्रधारः १ - न, न । अस्माभिः सर्वैर्देशः प्रगतिमार्गे नेयः। विभाजनविभीषिका विस्मारयितव्या।

सूत्रधारः २ - किं त्वं चिन्तयसि यत् सर्वे इमं सन्देशमङ्गीकुर्युः ?

सूत्रधारः १ – कथं न ? एतदर्थ सर्वे वयमेकत्रिता भवेम । एकता नः प्रतिभूतिः । इयं यत्नेन रक्षणीया।

सूत्रधारः २ - अस्तु, परन्तु अखण्डविभाजनसमये किं किं संवृतमिति कथय ।

सूत्रधारः १ - अस्मिन् विषये जनाः त्वां कथयिष्यन्ति, यैरिदं प्रत्यक्षीकृतम्....

गीतम्

वन्दे मातरम्, वन्दे मातरम्

वन्दे मातरम्, वन्दे मातरम्

वन्दे मातरम्, वन्दे मातरम्

वन्दे मातरम्, वन्दे मातरम्

बालाः - शुभमपराह्णं गुरो !

शिक्षकः - शुभमपराह्णम्। उपविशत । अस्तु, अग्रेसरामः। इदानीं शृणुत- अखिलभारतीयमुसलिमलीगदलस्य उपवेशनं ई.वी. 1947 वर्षे जूनमासस्य नवमदिनाङ्के नवदेहल्याम् इम्पीरियलहोटलमध्ये आयोजितम्।

बाल: १- अस्तु गुरो ! इतोऽप्यग्रे वृत्तमहं जानामि।

शिक्षकः - अरे पूनम ! त्वं तु सर्वं जानासि । ज्ञानं वितरणेन वर्धते। ज्ञानं वितर तावत्।

बाल: १ - मित्राणि! तत्र विभाजनप्रस्तावः सर्वसम्मत्या स्वीकृतः।

बालः २ - यस्य पक्षे त्रिशतं मतानि, विपक्षे च केवलं दश मतानि आगतानि।

बालः ३ - अपि च गुरो ! भारतीयमुसलिमलीगदलस्य कतिपये नेतारः नूतनाधिराज्यस्य पाकिस्तानस्य पूर्व-पश्चिम इति भागद्वयेन विभाजनादसन्तुष्टा आसन्।

बालः४- पुनः स्मरामि यत् समयेन प्रमाणीकृतं यत् अयं कदापि व्यावहारिको विचारो नासीत्।

बाल: ५- परस्ताच्च इदं सिद्धम्।

बालः ६ - आम्, ई.वी. 1971 वर्षे पूर्वपाकिस्तान: पाकिस्तानात् पृथग् जातः, नवीनस्वतन्त्रदेशरूपेण बाङ्ग्लादेशस्य घटना जाता।

पितामहः - भारतस्य नानाभागेषु ई.वी. 1946, ई.वी. 1947 वर्षयोः सङ्घटितायाः साम्प्रदायिकहिंसायाः व्यापकतां क्रूरतां चाधृत्य अनेकस्थलेषु पुस्तकेषु उल्लिखितं वर्तते। तेषु भागेषु अन्यतमो बङ्गभागः, यस्य गाथा न मया युष्माकं पुरतः उक्ता।

बालः - तत्र किं जातमिति वदतु पितामह !

पितामहः - श्रृणुत, वदामि।

सूत्रधारः १ - ई.वी. 1947 वर्षे मार्चमासस्य चतुर्थो दिनाङ्कः। अस्मिन् दिने आरक्षिभिः हिन्दु-सिखानां शोभायात्रायामेकस्यां गोलिकावृष्टिः कृता।

सूत्रधारः२ - सहसा मार्चमासस्य षष्ठदिनाङ्के प्रातः अमृतसर-जालन्धर-रावलपिण्डी- सियालकोटादिषु, पञ्जाबप्रान्तस्य सर्वेषु नगरेषु भूयान् कलहः प्रसृतः।

सूत्रधारः१ - पञ्जाबतुलनया बङ्गप्रदेशे दशकानि यावत् प्रचलतः विभाजनस्य, पुनर्वासस्य च रूपं पूर्णतः पृथगासीत्।

सूत्रधारः २ - बङ्गीया अत्यन्तं हतभाग्या आसन्।

सूत्रधारः१ - कुतः ?

सूत्रधारः२ - यतोहि बङ्गीयजनैः द्विवारं विस्थापनं सोढम्।

सूत्रधारः१- द्विवारम्?

सूत्रधारः२- आम्, द्विवारमेव ।

सूत्रधारः१- प्रथमवारं तु सर्वे स्वस्वगृहं त्यक्त्वा पूर्वपाकिस्तानं प्रति गताः।

सूत्रधारः२ - ततः पुनः पश्चिमबङ्गं प्रत्याव्रजिताः। भ्रातः, तत्रत्याधिकारिभिः विभाजनादुत्पन्नसङ्कटस्य भयावहता न्यूनीकृत्य आकलिता।

सूत्रधारः१- सहस्राणि हिन्दवः, तेषां परिवाराश्च ढाकाप्रान्तात् प्रपलाय्य सियालदहं प्राप्ताः।

सूत्रधारः २- सरलतया निर्भयं च ते न प्राप्ताः। मार्गे महिलाभ्य आभूषणानि अपहृतानि। ते नानाप्रकारैः प्रतारिताश्च ।

सूत्रधारः १- बालिकाः, महिलाः, वृद्धाँश्च प्रति अमानवीयव्यवहारा आचरिताः।

सूत्रधारः २ - महिलाः, शिशुन्, वृद्धाँश्च प्रति दुर्व्यवहारः आचरितः।

सूत्रधारः १ – अम्, इदं सत्यम्, विभाजनसमये महिलानां भूयसी क्षतिः समपद्यत ।

सूत्रधारः २ - अगणितपरिवाराः स्वपरिजनेभ्यः विच्छिन्नाः।

सूत्रधारः १- न केवलमेतत् । तत्र रेलयाने जनाः जीविताः आरूढाः, परन्तु शवसमुच्चयरूपेण अवतीर्णाः।

(बालः रोदितुमारभते)

पितामहः- मा रोदीः । तूष्णीं भव ।

बालः - पितामह ! ढाकातः आगतानां जनानां किमभवत् ? येषां सर्वं च्छिन्नम्।

पितामहः - तेषामपि अद्‌भुता कथा पुत्र ! उच्यते किल - न ते गृहस्य, न वा घट्टस्य ।

बाल - एवं कुतः ?

पितामहः - ते यदा स्वगृहाणि त्यक्त्वा पुनः देशं प्रत्यागताः, तदा ते स्वगृह एव शरणार्थिनोऽभवन्।

*गीतम्*

वहन्ति न**य**नेभ्यः पीडाया धाराः

वहन्ति नयनेभ्यः पीडाया धा**रा**ः

विक**लं** जीव**नं** निर्गता बन्धुता

विक**लं** जीव**नं** नि**र्ग**ता बन्धुता ॥

पात्रम् ३ – पूर्वपाकिस्तानात् एतावन्तः जना आगता यत् कस्यापि गृहे इञ्चमात्रमपि स्थानं शिष्टं नासीत् स्वसम्बन्धिनो वासयितुम्।

पात्रम् ४- पश्चिमबङ्गसर्वकारेण चटग्रामात्, नारायणगञ्जात्, बारीसालात्, चान्दपुराच्च शरणार्थिनः कोलकातायामानेतुं पञ्चदशवाष्पयानानां (Steamer) व्यवस्था कृता।

पात्रम् ३ – पूर्वपाकिस्तानात् जनैः जलमार्गेण पलायनं कृतमासीत् । काश्चन नावः जले मज्जिताः, कतिपयदिनेभ्यः परं जलोपरि शवाः तरति स्म ।

पात्रे ३+४ - किं विशिष्टमासीदस्माकं भूमौ, यदधिकर्तुमस्मत् अस्माकं सर्वं च्छिन्नम् ।

पात्रम् ३ - बङ्गेषु, पञ्जावेषु, गुजरातेषु, सिन्धुषु च विभाजनस्य अग्निः प्रदीपितः।

पात्रम् ४ - सिन्धुप्रदेशात् विस्थापिताः जना अत्रागताः, परन्तु सिन्धुराज्यमस्मभ्यं न लब्धम् ।

सूत्रधारः १ - सिन्धुशब्दात् स्मरामि यत् सर्वतोऽधिकाः सिन्धुपरिवाराः राजस्थानराज्ये आगताः ।

(सिन्धुपरिवाररूपेण)

सिन्धुपुरुषः – विभाजनात् परं पाकिस्तानात् अगणिताः शरणार्थिन आयाताः, राजस्थानराज्यं तेषु अन्यतमं यत्र भूरिसङ्ख्यायां शरणार्थिनः प्राप्ताः।

सिन्धुमहिला - राजस्थानराज्ये शरणार्थिनां कृते पुनर्वासव्यवस्था एका भहती परीक्षा आसीत् ।

सिन्धुपुरुषः - वयं राजस्थानसांस्कृतिकपरम्परायां परिवर्तिताः। अस्माकं संस्कृति-भाषा-रीत्यादयः परिवर्तिताश्च ।

सिन्धुमहिला - सिन्धौ अस्माकं महान् व्यापार आसीत् । अत्र तु स्वबालानां भाग्ये दिवसे द्विवारं भोजनमपि नासीत् ।

सिन्धुपुरुषः - तत्र ममापणगृहवस्तूनि सर्वाण्यपहृतानि ।

सिन्धुमहिला - तां रात्रिं कथं वयं विस्मरेम महोदय ! यदाऽहं स्वबालान् अङ्के निधाय छाविताऽऽसम् ।

सिन्धुपुरुषः - धावन्तः आत्मानं च जीवयन्तः वयं कस्यचन दूरसम्बन्धिनो गृहे राजस्थानस्थबिकानेरनगरे समागताः।

सिन्धुमहिला – मार्गेऽस्माकमनेके बान्धवा भ्रष्टाः, येऽद्यापि न दृष्टाः । कतिपये तु झुञ्झनुनगरे स्थिताः ।

सिन्धुमहिला - तेऽपि कियत्कालं यावदेतान् रक्षिष्यन्ति ? अन्ते सर्वे श्रान्ताः शीर्णाः शरणार्थिशिविरेषु आगताः। प्रसन्नाः, प्रमुदिताश्च परिवाराः, ग्रामाः, नगराणि च कथं नाशमलभन्त, तद्विषये कोऽवाऽधिकं मज्जानातु?

(उभे सचीत्कारं रुहतः)

(गीतम्)

वहन्ति **नयने**भ्यः पीडाया धाराः

वहन्ति नयनेभ्यः पीडाया धा**राः**

विक**लं** जीव**नं** निर्गता बन्धुता

विक**लं** जीव**नं** नि**र्ग**ता बन्धुता ॥

बालः – पितामह! सम्प्रति न मयाऽधिकं किमपि श्रोतव्यम्।

पितामहः - अरे बाल ! अधुना मया गुजरातगाथा तू नैव श्राविता । अस्माभिरिदमपि ज्ञातव्यं यत् तदानीं गुजरातराज्ये किमभूदिति ।

बालः – पितृव्ये! तत्र किमभूत् ?

पितृव्यः - राजनीतिकारणात् स्वदेश एवास्माभिः विभाजनविभीषिका सोढा । कतिपये शासनमिच्छन्ति स्म, कतिपये तु राजत्वम् । उपार्जनाय मम पति पाकिस्तानं गत आसीत् । परन्तु न प्रत्यावर्तितः । ममोपवसतौ महान् सम्मर्दः

प्रारब्धः। कतिपये उक्तवन्तः - गुजरातराज्यं पलायस्व । कतिपये तु पाकिस्तानं गन्तुं प्रेरयामासुः ।

सूत्रधारः २ - ततः परं मातः ! ?

गुर्जरी माता - अहं तु अष्टवर्षीयां कन्यामानीय गुजरातराज्यमभितः आगता ।

(तद् दृश्यं दर्श्यते)

गुर्जरी बाला - मातः। पिता तु पाकिस्तानं गतः । तत्रैव चलतु तावत् ।

गुर्जरी माता - नैव बाले! गुर्जरेष्वेव गच्छावः । पिताऽपि सर्वत्र शान्त्यामागतायां निश्चयेन प्रत्यावर्तिष्यते

गुर्जरी बाला- (भीता) मातः ! आवा कुत्र गमिष्यावः ? किमु आवा सुरक्षिते स्याव ?

गुर्जरी माता - आम् पुत्रि! आवां सुरक्षिते स्याव । आवां यत्र गच्छावः तत्रावश्यं सुरक्षिते स्थास्यावः ।

गुर्जरी बाला - मातः, अहं श्रान्ता । मां पिपासा बाधते । इतः परं चलितुं न शक्नोमि ।

गुर्जरी माता - अस्तु कन्ये ! निकटेऽवश्यं किमपि शिविरं स्यात् । तत्र गच्छावः।

गुर्जरी बाला - मातः । पितृव्यः कुत्र स्थितः ?

गुर्जरी माता - आवां तस्मात् विच्छिन्ने कन्यके !

गुर्जरी बाला - अम्ब, किं साम्प्रतं तातः न लप्स्यते ?

गुर्जरी माता - को जानाति? त्वं स्वपिहि तावत् ।

गुर्जरी बाला - एवं प्रतिदिनं मम कन्या रात्रौ इदं पृच्छन्ती अस्वपत् यत् पाकिस्तानात् पिता कदा प्रत्यावर्तिष्यत इति ।

(सर्वे रुदन्ति)

पितामहः - सम्पूर्णस्य देशस्यावस्था ईदृशी आसीत् ।

सर्वे - सत्यम्, सम्पूर्णस्य देशस्येदृशी अवस्थाऽऽसीत् ।

पात्रम् ३ - अस्मभ्यं पञ्जाबप्रान्तात् कश्चिद् भागः लब्धः, अर्थात् पञ्जाबप्रदेशः द्विधा विभाजितः । इदं विभाजनम् ईदृशं क्षतमस्ति ।

येन, अस्माकं पञ्जाबभ्रातृणां हृदयमुत्पाट्य पृथक् कृतम्।

सूत्रधारः १+२ - यत्र जीवनस्य प्रत्येकं प्रभातं स्मितैः पुलकितं भवति स्म, तत्रत्यं

दौर्गत्यं विलोक्य वाष्पोऽपि श्रोणितीबभूव ।

पात्रे ३+४ - नास्ति तव स्कन्धे पीडाया भारोऽधिकः। यदा तुलयामि तं विभीषिकया, युद्धेन, क्रूरतया च ।

पात्रम् १ - विभाजनस्य विभीषिकायां विसर्जित प्राणेभ्यः, अङ्गीकृतविस्थापनकष्टेभ्यश्च भारतवासिभ्यः नमःशतानि ।

पात्रम् २ - भारतस्य एकतामखण्डतां च सुरक्षितुं, सर्वैः सम्भूय प्रयासः करणीयः।

पात्रम् ३- विभाजनाय राजनीतिक्रीडायामेकस्य भ्रातुः शिरसि अपरस्मै भ्रात्रे विषं संन्यस्तम्।

पात्र ४- अस्यैव विषस्य कारणात् मनुष्येण मनुष्यः कर्तितः, विभाजितः, भ्रष्टश्च। अस्माकमखण्डं भारतं खण्डितञ्च।

पितामहः- यत् जातं तद् जातम्। परन्तु इदानीं वयं प्रतिज्ञां कुर्मः......

पात्रम्१- अस्माकं मध्ये यदि कोऽपि धर्मं, वर्णं, सम्प्रदायं वा आधृत्य छलं करोति, तर्हि तस्य प्रतारणा न स्वीकर्तव्या।

सर्वे - न, नैव स्वीकर्तव्या।

पात्रम्१ – भारतदेशोऽखण्डः रक्षणीयः।

सर्वे – भारतदेशोऽवश्यमखण्डो रक्षणीयः।

पात्र ४ – साम्प्रतं वयं कस्यापि राजनीतिकप्रवञ्चनां न स्वीकरिष्यामः।

सर्वे - साम्प्रतं वयं कस्यापि राजनीतिकप्रवञ्चनां न स्वीकरिष्यामः।

पात्रम् ४- अखण्डतया, एकाग्रतया च सुखेन, शान्त्या च स्वभारतमातरं विकसितां करिष्यामः।

सर्वे- स्वभारतमातरं विकसितां करिष्यामः।

एत, सर्वे प्रतिज्ञां कुर्मः,

भारतमाता जयतु, भारतमाता जयतु

गीतम्

**वन्दे मातरम् वन्दे मातरम्**

**वन्दे मातरम् वन्दे मातरम्**

**वन्दे मातरम् वन्दे मातरम्**

**वन्दे मातरम् वन्दे मातरम्**

---